# Shri Indrakshi Sahasranama Stotram

# श्रीइन्द्राक्षीसहस्रनामस्तोत्रम्

## Document Information

Text title : Indrakshi Sahasranama Stotram

File name : indrAkShIsahasranAmastotram.itx

Category : devii, otherforms, devI, sahasranAma

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : Rudrayamala, See corresponding nAmAvalI

Latest update : January 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# श्रीइन्द्राक्षीसहस्रनामस्तोत्रम्

ॐ श्रीगणेशाय नमः ।
ॐ नमोदेव्यै ।
देव्युवाच -
भगवन्सर्वलोकेश भक्तानामुपकारक ।
इन्द्राक्ष्या इष्टदेव्याश्च वद नामसहस्रकम् ॥ १॥

भैरव उवाच -
या देवी विष्णुमायेति विख्याता सर्वजन्तुषु ।
सैवेन्द्राक्षी परा देवी वज्रहस्ता परात्मिका ॥ २॥

लोकेश्वरी महाविद्या सदा चैतन्यरूपिणी ।
अष्टाविंशाक्षरी विद्या महाश्रीषोडशाक्षरी ॥ ३॥

तस्या नाम्नां सहस्रं च वक्ष्यामि सर्वभूतये ।
अस्य श्री इन्द्राक्षीनामसहस्रस्य भगवान्सदाशिव ऋषिः ।
अनुष्टुप्छन्दः । षोडशाक्षरी देवता ।
ह्रीं बीजं, सौः शक्तिः, क्लिं कीलमकम् ।
अशेषप्रत्यहशमनार्थे सर्वकामावाप्त्यर्थे पाठे विनियोगः ॥

ॐ ह्रीं श्रीं वज्रहस्ता ऐं सौः क्लीं वज्रिसमर्चिता फट् स्वाहा ।
ॐ वज्रिणी वाणी वैधसी विद्युदीश्वरी ।
ईशानी शाङ्करी शान्तिः शक्तिश्च भ्रुकुटिः कुटी ॥ १॥

शान्ता भ्रान्तिर्भवानी च भीमा भीता भयानका ।
चित्रा विचित्रा विजया विश्वेशी विश्वनायका ॥ २॥

विद्या विनायकी वीणावेणुहस्ता विभाविनि ।
विस्मया स्मयकर्त्री च विमानगतिशामिनी ॥ ३॥

वैमानिकेशी वशिनी वाग्भवी वीरसुन्दरी ।

वैतालिकी केलीरता कमला कमलाश्रिता ॥ ४॥

कामेश्वरी रतिः प्रीती रतिलीला ललद्रसा ।
लाङ्गलीशा ललत्त्रासा नाममौक्तिकराजिता ॥ ५॥

नाम्ना नारी नमस्तुत्या स्तुतितुष्टाऽतुलप्रभा ।
प्रेमकर्त्री जगत्स्तुत्या ज्वालामण्डितशेखरा ॥ ६॥

ज्वालामुखी जयकरी जयदा विजयेश्वरी ।
विनता वेनरोष्टा च वैनतेयधजाश्रया ॥ ७॥

ध्वजिनी रथगा रथ्या पथ्या प्रीतनसन्निभा ।
कस्तूरीरसरम्याङ्गी कर्पूरधवला शुचिः ॥ ८॥

शुचिस्मिता हास्यमुखी क्रोधिनी क्रोधविह्वला ।
क्रिमिहा क्रमगा क्रान्ता कायक्लेशविवर्जिता ॥ ९॥

वानीरतलगा वेणुर्वैरोचनिभयापहा ।
विभाकरप्रभा वेत्रधारिणी सर्पहारिणी ॥ १०॥

सर्पाशनगतिर्गीता गायत्री गोर्गरीयसी ।
गोघ्री सर्वमुखी सत्या सामगानरता रसा ॥ ११॥

रमा रेतःप्रभावजा रेतस्तुष्टा रजस्वला ।
रात्रिञ्चरी रजःशान्ता राजसी रेवती रुचिः ॥ १२॥

रात्रिरुजापहा रामा श्यामश्यामशमीलता ।
शाम्भवी शर्वरी शोभा शर्वरी शर्वसेविता ॥ १३॥

शशाङ्कमुकुटा शान्तिः शशाङ्काग्न्यर्कलोचना ।
शारदा शारदाम्भोजदलाक्षी दमकारिणी ॥ १४॥

दामोदरप्रिया देवी देवकी देवमानिता ।
दयावती दयाकर्त्री देवसूर्देववन्दिता ॥ १५॥

धृतिर्धरा च धरणी धरणीधरपुत्रिणी ।
दस्युहा दस्युजननी दस्युभीतिहरा हविः ॥ १६॥

हविष्या हरिसेव्या च हरिपत्नी हरार्चिता ।
हाटकेशी हलधरा हालाहलसदालसा ।
मोदकी मोदिनी मान्या मुरुप्रसूविभूषणा ॥ १७॥

मन्त्रावलिर्महामायामोचिनी पापमोचिनी ।
मानदा प्राणदा प्रीता प्रेतवाहा प्रजावती ॥ १८॥

प्रोत्तुङ्गकुचशोभाढ्या ढुल्लदम्भोजलोचना ।
सरसी सरसा साध्वी समस्तदुरितापहा ॥ १९॥

कोकिला कालवरदा कलान्तकफलावलीः ।
कोटरा कामिनी काम्या करालवदना कृशा ॥ २०॥

कृशाङ्गी कृषिरुग्रास्या सरित्सागरपुत्रिणी ।
सत्यामभिकसेव्या च सतानकतलस्थिता ॥ २१॥

विद्याविनयदा लोला लक्ष्मी लभ्या लयप्रदा ।
लूता लास्यरता लाजा लक्ष्मीनाथसमर्चिता ॥ २२॥

अक्षता त्र्यक्षिणी तारा त्रिपुरा त्रिपुरध्वनी । (त्रिपुरेश्वरी)
उग्रतारा जटाजूटा धारिणी जम्बुसन्निभा ॥ २३॥

जाम्बूनदप्रभा जेया ज्येष्ठा श्रेष्ठा जलन्धरा ।
जाग्रती च सुषुप्तिश्च जयमण्डितमूर्धजा ॥ २४॥

जगत्प्रसूर्जगत्प्रीता प्रेतराजक्षयङ्करी ।
परा पुण्यप्रदा प्रेता त्रयीमूर्तिस्त्रयीतनुः ॥ २५॥

त्रयीतनुनिभा त्र्याश्रा त्र्यक्षरी तारिणीतनुः ।
तन्वी त्रिपुरमाता च त्रिनेत्रा त्रिपुरोत्तमा ॥ २६॥

त्रिवर्गफलदाता च तोतलाऽतुलविक्रमा ।
त्रिविक्रमप्रसूस्त्र्यन्ता त्रयी त्रिपुरभैरवी ॥ २७॥

श्रीदा श्रीधरपत्नी च श्रीः श्रीदानकवितृदा ।
श्रीदेवी च महालक्ष्मीः सिद्धलक्ष्मी सरस्वती ॥ २८॥

बाला बालकतुष्टा च बाला बाल्यैकसुन्दरी ।
बलीयसी भल्लहस्ता बालकेया बलन्धरा ॥ २९॥

बलितुष्टा बलिभुजा वरदा बालकेश्वरी ।
बन्धुप्रिया वान्धवेशी बगला वैदवेश्वरी ॥ ३०॥

ब्रह्मास्त्रविद्या जटिला ब्राह्मणी क्षत्रियीमया ।

मारा प्रलयकर्त्री च मातङ्गी मत्तमानसा ॥ ३१॥

मत्तमातङ्गगा मेध्या मुक्तिदा मेदिनी मतिः ।
राजमातङ्गिनीमूर्तिः रजोगुणविभूषणा ॥ ३२॥

रतिदा स्मृतिदा मथ्या मेनका मानवर्धिनी ।
सुन्दोपसुन्दमथनी स्वरूपा च तिलोत्तमा ॥ ३३॥

रम्भा रम्भा च रम्भोरू संरम्भा रम्भकारिणी ।
सदानन्दा सदातुष्टा सदारुष्टा सदागतिः ॥ ३४॥

चलकेशा चला चान्ता चामीकरनिभानना ।
च्युताऽच्युतप्रिया चोल्या चुल्ली चेटी च सत्कृतिः ॥ ३५॥

चारुरूपा महाचारा जैनमार्गविरोधिनी ।
जननी जैनजननी जैनमार्गरसालसा ॥ ३६॥

रामिका रससन्तुष्टा रसा रामैकरोधिनी ।
रसोल्लासा रसासारसारिणी स्मरकारिणी ॥ ३७॥

राज्ञी राज्यप्रदा रौप्या राज्यदा भोगवर्धिनी ।
भगिनी भाग्यदा भोगा भगमाला भगात्मिका ॥ ३८॥

भीरुण्डा भयभर्ताभा भाविभा भीमरूपिणी ।
भयानकमुखाभीष्टफलदा फैनिलाप्रजा ॥ ३९॥

पीताम्वरा पीतमुखी पतङ्गशतसन्निभा ।
पतङ्गगामिनी पीनकुचा कुष्ठक्षयङ्करी ॥ ४०॥

वीरात्मिकान्तिका चाद्या वागिला वसुसुन्दरी ।
वासवी वसुमाता च वसुधा वाङ्मयी वटुः ॥ ४१॥

वटुप्रिया वटुगता वाचाढ्या वेशरूपिणी ।
वाराही वैष्णवी यष्टिर्यक्षिणी यदुनन्दिनी ॥ ४२॥

यादवेशी यज्ञकरी याज्ञिकेष्टवरप्रदा ।
यज्ञप्रिया यशोदा च यशोमाला यशस्विनी ॥ ४३॥

यानवा यजुर्माता च यात्रा च योगिनी यवा ।
वामचारप्रिया वामावार्ता वाग्वादिनी वसा ॥ ४४॥

यज्ञवाराहवरदा वामदेवी वसुन्धरा ।
शारिका शशिलेखा च शरदिन्दुशतप्रभा ॥ ४५॥

मनोजवा मनोरूपा महोग्रवपुषी वधूः ।
शशिनेत्रा शिवा शैनी शिववामाङ्गचारीणी ॥ ४६॥

ॐ ह्रीं श्रीमम्बिकाऽऽत्मीया चादिदेवी मनोहरा ।
इष्टदात्रीश्वरी चेशा ईशानी चेश्वरप्रिया ॥ ४७॥

उमा चोग्रमुखी मोह्योरगभूषणभूषिता ।
उन्नता चोन्नतकुचा चोदयाचलसंश्रया ॥ ४८॥

उदितादित्यसदृशी च योगफलदायिनी ।
उरुतन्वी तनुस्तारा चोषा बाणक्षयङ्करी ॥ ४९॥

अनिरुद्धप्रिया चोषा वेला चोषरमण्डला ।
ऊष्मोष्मज्वालानयना ऋजुर्यक्षैकसुन्दरी ॥ ५०॥

रूपा ऋक्षध्वजेष्टा च ऊष्मिणी चोष्मसुन्दरी ।
लिप्ता लिविर्लिविकरी लीना लीलालयस्वरा ॥ ५१॥

एणाक्षी ऐंस्वरूपाक्षी ऐश्वर्याऽऽश्चर्यरूपिणी ।
ओङ्कारप्रभवा चौष्टा चौत्सवी चोदयी विधिः ॥ ५२॥

अम्वा सुरेश्वरी शुक्रा अःस्वरूपैकसुन्दरी ।
कालिका कनकप्रीता कान्तिदा कामिनी प्रिया ॥ ५३॥

कठोरवपुषी कीला कीलिता कुब्जरूपिणी ।
कुब्जिका कूवरी कुन्ता केवला कान्तिसुन्दरी ॥ ५४॥

कामारिवरदा कान्तिः कामेष्टा कीर्तिसुन्दरी ।
कारुकी कटुकी कीर्तिः कटुवाक्कटुचोषिणी ॥ ५५॥

कालान्तकजिता कालीकेश्वरी केशवप्रिया ।
क्रीता क्रीततपा  क्रूरा क्रूरेशी क्रूरसुन्दरी ॥ ५६॥

क्रियावती क्रियाकर्त्री क्रिमिणी क्रमुकप्रिया ।
कूर्मेश्वरी कूर्मगतिः कूर्मिणी कूर्मरूपिणी ॥ ५७॥

काराकारैकनिगडा कारेशी कारमोचिनी ।
ककारवर्णमाला च ककाराक्षरसुन्दरी ॥ ५८॥

ऐं सौः ख्रीं खेचरी खान्ता खशी खेटकरुपिणी ।
खगामिनी खगगतिः खगेशी खगसुन्दरी ॥ ५९॥

खगहस्ता खगाक्षी च खरूपा खेशसुन्दरी ।
खकाररूपिणी खस्थाखकारामृतसुन्दरी  ॥ ६०॥

ॐ ह्रीं श्रीं गं गणेशानी गुणिनी गुणसुन्दरी ।
गुणिप्रिया गजपतिर्गजस्था गजगामिनी ॥ ६१॥

गरी गरिष्ठा गुटिका गानश्री गीतसुन्दरी ।
गया गीतप्रिया गम्या गुह्या गुह्यकसुन्दरी ॥ ६२॥

गिरिजा गिरिपूज्या च गिराशी गिरिसुन्दरी ।
ग्राहिणी गृहिणी गम्या गुहेशी गुहसुन्दरी ॥ ६३॥

गोर्गव्या गोमयी गान्ता गोकारी गोष्ठसुन्दरी ।
गजाननप्रिया ग्रीवा गोत्रेशी गोत्रसुन्दरी ॥ ६४॥

ग्रामिका ग्रहरूपा च ग्रहेशी ग्रहसुन्द्ररी ।
गुहप्रसूर्यहावासा गेहिनी गेहसुन्दरी ॥ ६५॥

गणका गणकेशानी गणेशा गणसुन्दरी ।
गणेशजननी गोपी गोपेशी गोपसुन्दरी ॥ ६६॥

गुह्यकेष्टप्रदा गेया गगनाकारसुन्दरी ।
ऐं सौः घनाकृतिर्घोषेशी घौषसुन्दरी ॥ ६७॥

घर्घरा घर्घरीमूर्तिः घटिका घटसुन्दरी ।
घनसन्निभमूर्तिश्च घवर्णामृतसुन्दरी ॥ ६८॥

ॐ ह्रीं श्रीं ङें ङान्तवर्णाङ्का रोकरसुन्दरी ।
ॐ ह्रिं श्रीं चर्मवासा च चर्मिणी चर्मसुन्दरी ॥ ६९॥

चन्द्रिका चन्द्रवदना चन्द्रेशी चन्द्रसुन्दरी ।
चराचरजगत्स्रष्टा चारुणी चारुसुन्दरी ॥ ७०॥

चलाचलाच्युतकचाच्युतेश्यच्युतसुन्दरी ।
चुम्बिनी चुलिका चारा चुरेशी दैत्यसुन्दरी ॥ ७१॥

चलत्कनककेयूरा चलत्कनकसुन्दरी ।

ॐ ह्रीं श्रीं छिन्नमस्ता च छित्रास्या छित्रसुन्दरी ॥ ७२॥

छित्रिका छित्रमुकुटा छकाराक्षरसुन्दरी ।
ॐ जुं सः हौं जयाकारा जगतीधरसुन्दरी ॥ ७३॥

जगच्छा न्ता जगत्स्रष्टा जगतीसृष्टिसुन्दरी ।
जम्बुप्रिया जम्बुवेशी जपेशी जपसुन्दरी ॥ ७४॥

जीवदा जिववरदा जीवेशी जीवसुन्दरी ।
ॐ ह्रीं काङ्कारिणी श्रोतिर्लेखाकाङ्कारसुन्दरी ॥ ७५॥

झिल्ली धनुर्ज्या ज्याघाता झकारानन्दसुन्दरी ।
ॐ श्रीं ञानुतनुर्ञन्ता ञकाराकारसुन्दरी ॥ ७६॥

ॐ ऐं सौः टङ्कहस्ता च टङ्केशी टङ्कधारिणी ।
ॐ ठः ठः ठः स्वरूपाद्या ठकारत्रयसुन्दरी ॥ ७७॥

ॐ ह्रीं डिम्बाहिडिम्बा च हिडिका डिंवसुन्दरी ।
ॐ श्रीं ह्रां ढकूति ढक्का ढाकृतिर्ढक्कसुन्दरी ॥ ७८॥

ॐ ह्रीं णात्मप्रिया णान्ता णवर्णानन्दसुन्दरी ।
ॐ ऐं स्त्रीं तटिनीतीर्था तीर्थेशी तिथिसुन्दरी ॥ ७९॥

तारप्रियान्तरी तुर्या तुर्येशी तुर्यसुन्दरी ।
त्रोटिका तुटिगन्धाढ्या त्रुटेशी त्रुटिसुन्दरी ॥ ८०॥

तारापतिः कला दात्री तारा कान्तारसुन्दरी ।
त्रेतायुगेश्वरी त्र्यम्बा त्र्यम्बकेश्वरसुन्दरी ॥ ८१॥

तलातलाश्रया तापी तकाराक्षरसुन्दरी ।
ऐं श्रीं स्थूलारविन्दाक्षी स्थूलजा जलसुन्दरी ॥ ८२॥

स्थन्डिला मण्डलाकारा थकारानन्दसुन्दरी ।
द्युतिर्देवी दयालुश्च दयारूपैकसुन्दरी ॥ ८३॥

दरी द्युतिमती दीप्ता दीप्तपावकसुन्दरी ।
दीप्तार्चिर्दीप्तशीखिनी दीपिता दीपसुन्दरी ॥ ८४॥

दमेश्वरी दमाकङ्क्षा दमदा दमसुन्दरी ।
दोलाक्रीडा दरी गुह्या दरिद्रा दारसुन्दरी ॥ ८५॥

दारिद्र्यशतकोटिघ्नी दारिद्राक्षरसुन्दरी ।
ॐ सौंः सौ धनदा धर्म्या धर्मेष्ठा धर्मसुन्दरी ॥ ८६॥

धन्या धन्यजनस्तुत्या धर्मिणी धातृसुन्दरी ।
धनदैकप्रिया धात्री धरित्री धीरसुन्दरी ॥ ८७॥

धर्मकर्मप्रिया धीरा धीरवीरैकसुन्दरी ।
ओं क्रीं नारायणी नीवी नृसिंही सिंहसुन्दरी ॥ ८८॥

नरनारायणीमूर्तिर्नर्मकर्मैकसुन्दरी ।
नर्मसाचिव्यकोल्लासा नादेशी नादसुन्दरी ॥ ८९॥

नटिनी नाटकोल्लासा नटनर्तनसुन्दरी ।
नर्मदा नलिनी नीला नलिनेक्षणसुन्दरी ॥ ९०॥

ॐ ऐं प्रीं परमा पूता पोतेशी पोतसुन्दरी ।
पण्यदा पणया साक्षी पण्यश्री पण्यसुन्दरी ॥ ९१॥

परान्त्रिका परोल्लासा पीवरा पीनसुन्दरी ।
फट्कारा च वषट्कारा फलदा फलसुन्दरी ॥ ९२॥

फट् स्वरूपा फडाकारा फट् वर्णामृतसुन्दरी ।
ॐ ऐं बालेश्वरी बभ्रुर्बलर्द बलसुन्दरी ॥ ९३॥

बलिदानवयक्षेशी बलिभुक्यतिसुन्दरी ।
ॐ श्रीं भैं भद्रकाली च भद्रदा भद्रसुन्दरी ॥ ९४॥

ॐ ह्रीं भर्गशिखा भार्गी भार्गवेश्वरसुन्दरी ।
भर्ग्या भर्गाङ्गवसतिर्भर्गाख्याभर्गसुन्दरी ॥ ९५॥

भगलिङ्गामृतप्रीता भगलिङ्गैकसुन्दरी ।
भगानन्दा भगोल्लासा भगेशी भगसुन्दरी ॥ ९६॥

भगोत्तमा भगानन्दा भगानन्दैकसुन्दरी ।
भगलिङ्गामृतस्नाता भगविर्वैकसुन्दरी ॥ ९७॥

भगबिम्बा भगाद्या च भोगेशी भोगसुन्दरी ।
भोगापवर्गदा भाग्या भगस्था भीमसुन्दरी ॥ ९८॥

भीमनादा भीमरदा भीमहा भीमसुन्दरी ।
ॐ श्रीं मृत्तिका मृत्स्ना मार्जारी मृडसुन्दरी ॥ ९९॥

मीना मैनाकभगिनी माणिकेश्वरसुन्दरी ।
महोरस्का महीमध्या माधवी मधुसुन्दरी ॥ १००॥

मधुमत्ता महाज्योतिर्मेरुस्था मेरुसुन्दरी ।
मधुक्षीबा मदारक्ता मद्देशी मधुसुन्दरी ॥ १०१॥

ॐ श्रीं योगप्रिया योग्या योगेशी योगसुन्दरी ।
ॐ यज्ञदक्षिणा वाज्या ॐ यक्षैश्वर्यसुन्दरी ॥ १०२॥

ॐ यक्षवेगनिलया यक्षवेलैकसुन्दरी ।
यमेष्टा यमदा यात्रा यमैश्वर्यादिसुन्दरी ॥ १०३॥

यमिनी यामिनी याम्या यामवेलैकसुन्दरी ।
योगियोगफला यादोनाथेष्टा नाथसुन्दरी ॥ १०४॥

याना यानरसा यष्टियाकारोल्लाससुन्दरी ।
ॐ रां रसातलस्था च रसदा राससुन्दरी ॥ १०५॥

रसस्वाता रैवतकी रेवा रैवतसुन्दरी ।
रविकोटिप्रभा दीप्ती रविजा रविसुन्दरी ॥ १०६॥

राक्षसी रक्षसां रक्ता राणी राक्षससुन्दरी ।
रजोवती राणसिकी राका राक्षरसुन्दरी ॥ १०७॥

ॐ ह्रीं श्रीं लम्बकेशा लम्बोष्ठी लम्बसुन्दरी ।
लम्बोदरप्रिया लम्म्या लञ्चा लाङ्गूलसुन्दरी ॥ १०८॥

ललद्दंसा ललन्नेत्रा लालिता लल्लिसुन्दरी ।
लोहिताक्षी ललन्मूर्तिर्लोहिता लोहितेश्वरी ॥ १०९॥

लोहिताम्बरभूषाढ्या लकारामृतसुन्दरी ।
ॐ वां वनेचरप्रिया वेदिका वेदसुन्दरी ॥ ११०॥

वलिता वालिजननी वालुका वालिसुन्दरी ।
वरप्रिया वरोल्लासा वारिणी वारिसुन्दरी ॥ १११॥

वरज्येष्ठा कानिष्ठा च वालुप्ता लुप्तसुन्दरी ।
व्योमगा वारिधिसुता वराकानन्दसुन्दरी ॥ ११२॥

ॐ श्रीं शशिसहस्राभा शीतङ्गा शङ्करप्रिया ।

शौत्यप्रिया शतानन्दा शतगा शीतसुन्दरी ॥ ११३॥

शतयज्ञैकवरदा शतयक्षैकसुन्दरी ।
शतक्रतुप्रिया शर्मदायिनी शक्रसुन्दरी ॥ ११४॥

शिवप्रिया शूलहस्ता शुक्रेशी शुक्रसुन्दरी ।
शोकहाऽशोकमालाढ्या शुक्ला शोकैकसुन्दरी ॥ ११५॥

शुक्लवासा शुक्लमुखी शकाराक्षरसुन्दरी ।
ॐ श्रीं षडक्षरा षड्वर्णा खावर्णसुन्दरी ॥ ११६॥

षोडशी षोडशकला षोडशार्णार्णसुन्दरी ।
ॐ ऐं सौंः सात्त्विकी सीता सरला सीरसुन्दरी ॥ ११७॥

सुक्माला सनया सौम्या सौम्येशी सौम्यसुन्दरी ।
सुस्वरा सुनकाध्यक्षा सनकाध्यर्षिसुन्दरी ॥ ११८॥

समस्तनरकत्राता समस्तनरसुन्दरी ।
समस्तभयहा देवी समस्ताभयसुन्दरी ॥ ११९॥

समस्तजयदा ज्वाला ज्वालामण्डलसुन्दरी ।
सौंः सौंः सौंः सौंः स्वमन्त्रास्व सौंःमन्त्राक्षरसुन्दरी ॥ १२०॥

ॐ ह्रीं हरिहरेशानी हरेशी हरसुन्दरी ।
हरपत्नी हविर्ज्वाला हव्याढ्या हरसुन्दरी ॥ १२१॥

होतृसेव्या हकाराद्या ह्रीङ्काराक्षरसुन्दरी ।
ॐ क्ष्मां क्ष्मायती क्षीवा क्षान्ता क्षीरार्णवस्थिता ॥ १२२॥

क्षिरांवुधिप्रियाक्षेष्टा चाक्षेशी क्षीरसुन्दरी ।
क्षीराब्धितनया क्षान्ता क्षकारामृतसुन्दरी ॥ १२३॥

अकारादिक्षकरान्ता लक्षतत्त्वादिसुन्दरी ।
ब्राह्मी च वैष्णवी चैशी ब्रह्मेष्टा ब्रह्मसुन्दरी ॥ १२४॥

नवतत्त्वप्रकाशाढ्या नूतना विष्णुसुन्दरी ।
नवपीठनिवासस्था शिवदा शिवसुन्दरी ॥ १२५॥

नवेन्द्रियैकनिलया शिवदा शिवसुन्दरी ।
नवगाथारसाकाङ्क्षा गाथा गगनसुन्दरी ॥ १२६॥

नवरत्नविभूषाढ्या ब्रह्मा ब्रह्माण्डसुन्दरी ।
नवद्वीपैकवसतिः पीता पातालसुन्दरी ॥ १२७॥

नवपन्नगहाराढ्या प्रान्ता पन्नगसुन्दरी ।
नवमातृक्रमोल्लासा नाव्या नक्षत्रसुन्दरी ॥ १२८॥

नवपर्वतप्रस्थस्था नवमन्त्राङ्कसुन्दरी ।
अकचादि ऋतोन्नद्धपयशाक्षरकर्मिणी ॥ १२९॥

तलातलादिपातालचारीणी सर्वसुन्दरी ।
ॐ ह्रीं श्रीं ऐं सौः क्लीं देवी फट् स्वाहेन्द्राक्षिणी परा ॥ १३०॥

फलश्रुतिः ।
इतीन्द्राक्ष्याः परं नाम्नां सहस्रं शिवभाषितम् ।
सर्वमन्त्रैकनिलयं सुन्दरीति मनुप्रियम् ॥ १३१॥

नवतत्त्वमयं दिव्यं ब्रह्माण्डान्तं सुधामयम् ।
भोगापवर्गदं पुण्यं सर्वतीर्थैकसाधनम् ॥ १३२॥

बलदं सर्वदा शान्तं ग्रहाणां शान्तिकृत्परम् ।
सर्वरोगभयहरं सर्वदेवप्रियं महत् ॥ १३३॥

भूतप्रेतपिशाचादियक्षराक्षसभीतिषु ।
पठेद्वा पाठयेन्नाम्नां सहस्रं मन्त्रगर्भिकम् ॥ १३४॥

दूरादेव पलायन्ते खगेशादिव पन्नगाः ।
कुष्ठादयो महारोगाः शममेष्यन्त्यसंशयम् ॥ १३५॥

साधकस्य सदा पुण्यवर्धनं धनवर्धनम् ।
सर्वकालैकफलदं सर्वमन्त्रैकसाधनम् ॥ १३६॥

भूर्जत्वचि लिखेन्मन्त्रं सूर्यवारे च साधकः ।
गोरोचनैः कुङ्कुमेन धारयेत्सव्यके भुजे ॥ १३७॥

इन्द्राद्या निर्जराः सर्वे रावणाद्या निशाचराः ।
सम्युगे च जित्वा धृत्वा नाम्नां सहस्रमुत्तमम् ॥ १३८॥

रामभद्रेण सहसा विष्णुना दैत्यपुङ्गवाः ।
भौमेऽष्टम्यां श्मशाने च पठेन्नाम्नां सहस्रकम् ॥ १३९॥

जपेदष्टोत्तरशतं देव्याः पर्षद्वरो भवेत् ।

अमावस्यां निशीथे च रवौ नाम्नां सहस्रकम् ॥ १४० ॥

पठित्वा पुलिने नद्याः बृहस्पतिसमो भवेत् ।
स्तम्भयेद्रिपुसैन्यादिदस्युवादिमुखानि च ॥ १४१ ॥

मोहयेत्परमेशानं वशयेद्भुवनत्रयम् ।
मारयेद्रियुसङ्घातं साधयेन्मन्त्रसञ्चयम् ॥ १४२ ॥

आकर्षयेदश्मरस उच्चाटयति वैरिणः ।
पठनाच्छ्रवणात्सत्यं धारणात्साधकोत्तमः ॥ १४३ ॥

इहलोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ।
त्रिसन्ध्यं यः पठेद्भौमे त्रिस्त्रिवारं शुचिव्रतः ॥ १४४ ॥

भूमिशायी सुधीर्देवीं दर्शयेद्वरदायिनीम् ।
रणे राजभये कुञ्जे घोरदावाग्निभीतिषु ॥ १४५ ॥

पयोधौ पोतवायौ वा सङ्कटे राजसन्निधौ ।
चौरभीतिषु दुर्गेषु सिंहश्वापदभीतिषु ॥ १४६ ॥

पठेन्नाम्नां सहस्रन्तु साधको मुच्यते भयात् ।
प्रभावमस्या नाम्नां तु सहस्रस्यैह वर्णितुम् ॥ १४७ ॥

न च शक्नोमि शक्तोऽपि शेषा हि विफलं पदम् ।
अलं विस्तरमात्रेण यः पठेत्साधकोत्तमः ॥ १४८ ॥

विचरेद्भुवनेष्वेको यथाहं भैरवोत्तमः ।
इति नाम्नां सहस्रं तु सर्वमन्त्रैकरूपिणम् ॥ १४९ ॥

इन्द्राक्ष्यः सर्वसर्वस्वं रहस्यं स्वर्गवासिनाम् ।
सर्वार्थसाधनं लोके सर्वतन्त्रागमार्णवम् ॥ १५० ॥

गुह्यं गुप्तं सदा गोप्यं गोप्तव्यं पशुसङ्कटे ।
गृहिणां योगदं नित्यं योगिनां मुक्तिदं सदा ॥ १५१ ॥

इन्द्राक्ष्या वज्रहस्ताया नाम्नां सहस्रकं परम् ।
गुह्यातिगुह्यगोप्तव्यं गोपनीयं स्वयोनिवत् ॥ १५२ ॥

इति श्रीरुद्रयामले तन्त्रे इन्द्राक्षीनामसहस्रं समाप्तम् ॥

Encoded by Sivakumar Thyagarajan Iyer

Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri Indrakshi Sahasranama Stotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*